## स्तुतस्तोमयोश्छन्दसि । (१०३/३६४२)

एकेषाम् इति वर्तते । स्तुत स्तोम इत्येतयोः सकारस्य छन्दसि विषये मूर्धन्यादेशो भवति एकेषामाचार्याणां [1]मतेन । [2]त्रिभिष्टुतस्य, [3]त्रिभिस्तुतस्य । गोष्टोमं (तै. सं. ७.४.११.१) षोडशिनम्, गोस्तोमं [4]षोडशिनम् (आप. श्रौ. २३.१२.१८) । पूर्वपदात् इत्येव सिद्धे[5] प्रपञ्चार्थम् इदम् ॥

## पूर्वपदात् । (१०४/३६४३)

[6]छन्दसि इति वर्तते, एकेषाम् इति च । पूर्वपदस्थान्निमित्तात् [7]परस्य सकारस्य मूर्धन्यादेशो भवति छन्दसि विषये एकेषामा[8]चार्याणां मतेन । 'द्विषन्धिः' । (मै. ३.८.२), द्विसन्धिः । 'त्रिषन्धिः' (मै.३.८.२), त्रिसन्धिः । [9]मधुष्ठानम्, मधुस्थानम् । 'द्विषाहस्रं चिन्वीत' (तै. ५.६.८.२), द्विसाहस्रं चिन्वीत । असमासेऽपि यत् पूर्वपदं तदपि इह गृह्यते । [10]'त्रिः षमृद्धत्वाय' (ऐ. ब्रा.२.१६), त्रिः समृद्धत्वाय ॥

## सुञः । (१०५/३६४४)

सुञ् इति निपात [11]इह गृह्यते, तस्य पूर्वपदस्थान्निमित्तात् उत्तरस्य मूर्धन्यादेशो भवति छन्दसि विषये । 'अभी षु णः [12]सखीनाम्' (ऋ. ४.३१.३) । 'ऊर्ध्व ऊ षु ण ऊतये' (ऋ. १.३६.१३)[13] ॥

## सनोतेरनः । (१०६/३६७५)

सनोतेः[14] अनकारान्तस्य सकारस्य मूर्धन्यादेशो भवति । 'गोषाः' (ऋ. ९.२.१०) । 'नृषाः' (ऋ. ९.२.१०)[15] । अनः इति किम् ? 'गोसनिं [16]वाचमुदेयम्' (अ. वे. ३.२०.१०) पूर्वपदात् इत्येव सिद्धे नियमार्थमिदम्[17] । अत्र केचित् सवनादिपाठाद् गोसनिर्नियमस्य फलं न भवति इति सिसानयिषति इति प्रत्युदाहरन्ति । सिसनिषतेः [18]अप्रत्ययः । सिसनीः इत्यपरे ॥

## सहेः पृतनर्ताभ्यां च । (१०७/३६४६)

पृतना [19]ऋत इत्येताभ्यामुत्तरस्य [20]सहिसकारस्य मूर्धन्यादेशो भवति । 'पृतनाषाहम्' (ऋ. ६.७२.५) । ऋताषाहम् । केचित् सहेः इति योगविभागं कुर्वन्ति[21] । 'ऋतीषहम्' (ऋ. ६.१४.४) इत्यत्रापि यथा स्यात् । [22]ऋतिशब्दस्य पूर्वपदस्य संहितायाम् [23]एतद् दीर्घत्वम् । अवग्रहे तु ऋतिसहम् इत्येव भवति । [24]चकारोऽनुक्तसमुच्चयार्थः, तेन '[25]ऋतीषहम्' (ऋ. ६.१४.४) इति सिद्धम् ॥

---

1. मतेन नास्ति ह. 2. नृभिष्टुतस्य ब. इ. ड. ह. 3. नृभिः स्तुतस्य ब. इ. ड. ह. 4. षोडशिनम् नास्ति क. 5. तस्यैव इत्यधिकम् ड. 6. वाक्यमिदं नास्ति 7. उत्तरस्य ब. क. 8. आचार्याणां नास्ति ब.क. ड़. 9. मधुष्ठलम् मधुस्थलम् ह, मधुष्ठालम् (मै. 1.11.7) इ. 10. पूर्वपदात् इति तेनेहापि भवति त्रिषसं दत्वा यः इत्यधिकम् क, तेन वाक्येऽपि भवति इत्यधिकम् ड. 11. इह नास्ति इ. 12. सवीमाम् ब. 13. इकः सुञि इति दीर्घः । नश्चधातुस्थोरुषुभ्य इति णत्वम् इत्यधिकम् ब. क. ड. इ. ह. 14. धातोः इत्यधिकम् ब. 15. जनसनखनक्रमगमो विट् । विड्वनोरनुनासिकस्यात् इत्यधिकम् ब.इ. 16. वाचमुदीरयन् इति मुद्रितः पाठः 17. वचनम् इत्यधिकम् इ. 18. क्विप्रत्ययः ब. 19. ऋती क. 20. सहेः सकारस्य ब. 21. इति इत्यधिकम् ब. 22. ऋत इ. 23. एव क. इ. 24. वाक्यमिदं नास्ति ह, चकारात् ऋतिषाहम् इ. 25. ऋतषहम् ब.